# आदर्शप्रश्नपत्रम् 2021-22
## द्वितीयं सत्रम्
## कक्षा - दशमी
## संस्कृतम् (कोड संख्या - 122)

**समयः – होराद्वयम्** **अङ्कयोजना** **सम्पूर्णाङ्काः – 40**

**अवधातव्यम् -**

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. **आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्त्तव्यः।** यथा चित्रवर्णने पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि सप्तवाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्।
3. अनुच्छेदे श्लोके नाट्यांशे वा पृष्टाः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः एतेषु प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।

| | | |
|---|---|---|
| | **वर्णनात्मकाः प्रश्नाः** | **40 अङ्काः** |
| | **अपठितावबोधनम्** | |
| 1 | **अपठित-गद्यांशः**<br>**अ. एकपदेन उत्तरत –** **(केवलं प्रश्नद्वयम्)**<br>(i) उलूकम्<br>(ii) वायसः<br>(iii) शिक्षितः/योग्यजनः | 10<br><br>1×2=2 |

| | | |
|---|---|---|
| | **आ. पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्)**<br>(i) वायसः उलूकस्य राजपदे प्रतिष्ठापनविषये अवदत् यत्-“यस्य देशस्य राजा एवम् अन्धो भविष्यति तस्य प्रजा अपि तथैव भविष्यति।”<br>(ii) लोकतान्त्रिकदेशेषु यथा राष्ट्रप्रमुखः सर्वकारो वा तथा तस्य देशस्य स्थितिःभवति।<br>(iii) वायसः यदा उलूकस्य अभिषेकोत्सवः प्रारब्धः तदैव तत्रागच्छत्।<br>**इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत –**<br>**बुद्धिमान् वायसः/चतुरः वायसः / यथा राजा तथा प्रजा/ अथवा योग्यः राजा।**<br>छात्रस्य उत्तरं दृष्ट्वा छात्रहिताय समुचितः निर्णयः करणीयः।<br>**ई. यथानिर्देशम् उत्तरत (केवलं प्रश्नत्रयम्)**<br>(i) वायसः<br>(ii) वायसः<br>(iii) पुरातनी<br>(iv) दिवान्धः | 2×2=4<br><br><br><br><br>1<br><br><br>1×3=3 |
| | **रचनात्मकं कार्यम्** | |
| **2.** | **पत्रलेखनम्**<br><br>गुरुग्रामात्,<br>दिनाङ्कः-<u>05.03.22</u><br><br>प्रिय हार्दिक !<br>(i) **<u>स्नेहाशिषः</u>**।<br>मात्रा लिखितं पत्रं प्राप्तम्। तेन (ii) **<u>पत्रेण</u>** मया ज्ञातं यत् भवान् सन्तुलितभोजनं न (iii) **<u>सेवते</u>**, प्रतिदिनं च ‘चाऊमीन-बर्गर' इति खादति। (iv) **<u>ईदृशं</u>** भोजनं स्वास्थ्याय सम्यक् न अस्ति। यदा कदा तु अस्य (v) **<u>सेवनं</u>** कर्तुं शक्यते, परं प्रतिदिनं (vi) **<u>त्वरितभोजनस्य</u>** सेवनं स्वास्थ्याय हानिकरम्।<br>स्वास्थ्याय तु सन्तुलितभोजनं (vii) **<u>ग्रहीतव्यम्</u>** एव यतः 'स्वस्थशरीरे एव स्वस्थमनसः वासः' भवति। अतः भवान् त्वरितभोजनस्य सेवनं (viii) **<u>त्यजतु</u>** करोतु। स्वास्थ्यवर्धकं भोजनमेव खादतु। अनेन भवान् कदापि (ix) **<u>रुग्णः</u>** न भविष्यति। भवान् स्वस्वास्थ्यविषये जागरुकः तिष्ठतु इति मे अनुरोधः।<br><br>भवदीया (x) **<u>अग्रजा,</u>**<br>हिमांशी | **½×10=5** |

| | | |
|---|---|---|
| | | |
| 3. | चित्रवर्णनम्<br>अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते। केवलं वाक्यशुद्धिः द्रष्टव्या। **अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति।** वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति। प्रतिवाक्यम् अर्धः अङ्कः भावस्य कृते अर्धः अङ्कः च व्याकरणदृष्ट्या शुद्धतानिमित्तं निर्धारितः अस्ति। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति। छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्यते।<br>**अथवा**<br>अनुच्छेदलेखनम्<br>अयं विकल्पः सर्वेभ्यः अस्ति। छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति। अतः अङ्काः देयाः। अस्य मूल्याङ्कनाय अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीयाः। | 1×5=5 |
| | | |
| 4. | अनुवादः (केवलं वाक्यपञ्चकम्)<br>(i) गृहात् बहिः द्वौ बालकौ क्रीडतः/खेलतः।<br>(ii) 'मेघदूतम्' कालिदासस्य प्रसिद्धा कृतिः/रचना अस्ति।<br>(iii) यूयं ह्यः किमर्थं न आगताः / आगतवन्तः/ आगच्छत।<br>(iv) तौ तत्र गच्छताम्।<br>(v) परिश्रमी जनः सदैव सफलः भवति।<br>(vi) सर्वे छात्राः निश्चयेन / ननु सफलाः भविष्यन्ति।<br>(vii) सा बालिका पुस्तकम् अपठत् / पठितवती। | 1×5=5 |
| | **पठितावबोधनम्** | |
| 5. | गद्यांशः<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) निर्धनः / निर्धनजनः<br>(ख) आश्रयम्<br>(ग) छात्रावासे<br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः।<br>(ख) निर्धनः जनः अर्थकार्श्येन पदातिरेव प्राचलत्। | 3<br>½×2=1<br><br><br><br>1×2=2 |

| | | |
|---|---|---|
| | (ग) 'निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा', एवं विचार्य सः जनः पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कश्चिद् गृहस्थमुपागतः। | |
| | | |
| 6. | **पद्यांशः**<br>**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) मृगाः<br>(ख) सुधियः<br>(ग) गोभिः<br>**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) समान-शील-व्यसनेषु सख्यं भवति।<br>(ख) तुरगाः तुरङ्गैः सह अनुव्रजन्ति।<br>(ग) मूर्खाः मूर्खैः सुधियः सुधीभिः सह अनुव्रजन्ति। | 3<br>½×2=1<br><br><br><br>1×2=2 |
| | | |
| 7. | **नाट्यांशः**<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) वसन्तसमये<br>(ख) काकः<br>(ग) काकचेष्टः<br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) अन्ते काकः पिकं प्रति वदति -"अरे परभृत्! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः? अतः अहं एव करूणापरः पक्षिसम्राट् काकः" इति।<br>(ख) अनृतं वदसि चेत् काकः दशेत्।<br>(ग) काकः आत्मानं वनराजः भवितुं योग्यः चिन्तयति। | 3<br>½×2=1<br><br><br><br>1×2=2 |
| | | |
| 8. | **अन्वयः**<br>पिता **पुत्राय** बाल्ये महत् **विद्याधनं** यच्छति, अस्य **पिता** किं तपः तेपे इति **उक्तिः** तत्कृतज्ञता।<br>**अथवा**<br>**भावार्थे रिक्तस्थानपूर्तिः**<br>अस्य भावोऽस्ति यत् यः मानवः (i) **स्वकीयं** कल्याणम् अधिकं च सुखम् (ii) **इच्छति**, सः कदापि अन्येषां जनानां कृते अकल्याणकरं (iii) **कर्म** न कुर्यात् अपितु सर्वदा (iv) **कल्याणकरं** कर्म कुर्यात्। | **½×4=2**<br><br><br><br>**½×4=2** |

| | | |
|---|---|---|
| 9. | **कथा-क्रमानुसार-लेखनम् –**<br>(i) विचित्रा दैवगतिः। तस्यामेव रात्रौ कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः।<br>(ii) तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः।<br>(iii) चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अगृहणाच्च, परं विचित्रमघटत।<br>(iv) चौरः एव उच्चैः क्रोशितुमारभत – 'चौरोऽयं चौरोऽयम्' इति।<br>(v) तस्य तारस्वरेण ग्रामवासिनः प्रबुद्धाः।<br>(vi) ग्रामवासिनः स्वगृहाद् निष्क्रम्य अतिथिमेव चौरं मत्वा अभर्त्सयन्।<br>(vii) यद्यपि ग्रामस्य आरक्षी एव चौरः आसीत्।<br>(viii) तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्। | ½×8=4 |

-------------0000--------------